**दिनाङ्क:- 26.02.2026** **प्रात: - 06:55**

**<u>प्रधानमन्त्री - इजरायल</u>**

प्रधानमन्त्री नरेन्द्रमोदी इजरायल-प्रधानमन्त्रिणा बेन्जामिन नेतन्याहू इत्यनेन सह तेल-अवीव इत्यत्र द्विपक्षीयवार्तालापं कृतवान्। जलप्रबन्धनं, कृषिः, प्रौद्योगिकी च इत्यादिषु अनेकक्षेत्रेषु सहकार्यं वर्धयितुं उभौ नेतारौ चर्चां कृतवन्तौ।
जेरुसलेमनगरे प्रधानमन्त्रिणा श्रीमोदिना इजरायलस्य **<u>नेसेट</u>** इति संसत् सम्बोधनं कृत्वा प्रोक्तम् यत् अस्य प्रतिष्ठित-सदनस्य समक्षं स्वस्य उपस्थितिः सौभाग्यमयी गौरवप्रदा च वर्तते। प्रधानमन्त्री मोदी, हमास-इत्यनेन कृतस्य आतङ्कवादी-आक्रमणस्य घोर-निन्दां कृत्वा निर्दोष-नागरिकाणां वधः केनापि कारणेन न्याय्यं न भवितुम् अर्हति इति उक्तवान्।

इजरायलस्य प्रधानमन्त्री नेतन्याहू प्रोक्तवान् यत् प्रधानमन्त्री मोदी न केवलम् मित्रम्, अपि तु भ्राता अपि वर्तते।

**<u>पीएम मोदी नेसेट पदक</u>**

भारत-इजरायल-देशयोः रणनीतीक-सहयोगस्य सुदृढीकरणाय, इजरायलस्य संसदा, प्रधानमन्त्रिणे नरेन्द्रमोदिने **<u>"स्पीकर आफ द नेसेट् मेडल"</u>** इति पदकपुरस्कारेण सम्मानितम्। प्रधानमन्त्री मोदी प्रथमः विश्वनेता अस्ति यः एतत् सम्मानं प्राप्तवान्। अन्तर्जालीय-सन्देशे प्रधानमन्त्रिणा उक्तं यत् सः नेसेट् पदकं अत्यन्तविनयपूर्वकं, कृतज्ञतया सह स्वीकुर्वति।

गृहमन्त्री अमितशाहः इजरायल्-देशेन **<u>"स्पीकर आफ द नेसेट् मेडल"</u>** इति सम्मानप्राप्तये, प्रधानमन्त्रिणे नरेन्द्रमोदिने अभिनन्दनं कृत्वा उक्तवान् यत् प्रत्येकस्य भारतीयस्य कृते एतत् अपारगौरवस्य क्षणं वर्तते।

**दिल्ली शोध सम्मेलन-2026**

राष्ट्रिय-खाद्यप्रौद्योगिकी-उद्यम-प्रबन्धनसंस्थानम्, अद्य आरभ्य त्रिदिवसीय-अन्ताराष्ट्रियसम्मेलनस्य आयोजनं करिष्यति। सम्मेलने सहस्राधिकाः प्रतिनिधयः आगमिष्यन्ति इति अपेक्षा अस्ति। अस्य उद्देश्यं, भाविष्यस्य दृष्ट्या स्वास्थ्य-वर्धक-खाद्यपदार्थानां विमर्शः।

**नागालैंड**

नागालैंडस्य दीमापुरे त्रिदिवसीय-पूर्वोत्तर-वसन्तोत्सवः अद्यारभ्य आरभ्यते। अस्य आयोजनस्य उद्देश्यं पूर्वोत्तरभारतस्य समृद्धस्य लोकजनजातीयसांस्कृतिक-परम्परायाः प्रचारः संरक्षणं च अस्ति। अनेन सह अयम् उत्सवः पारम्परिक-कलाकारेभ्यः राष्ट्रियमञ्चमपि प्रदास्यति।

**रेलवे - होली महोत्सव**

आगामिहोलीमहोत्सवे यात्रिकाणां कृते सुचारु, सुरक्षित, आरामदायक-यात्रां सुनिश्चेतुं, भारतीयरेलवेप्राधिकरणेन विशेषव्यवस्था कृता अस्ति। अष्टादश-मार्चपर्यन्तं यात्रिकाणां संख्यायां अपेक्षितवृद्धिं दृष्ट्वा रेलवे, विभिन्नरेलक्षेत्रेषु द्वादश-शताधिक-विशेषरेलयानानां संचालनं करिष्यति।

**सीबीआई निगडनम्:**

सीबीआई इति केन्द्रीय अन्वेषण विभागेन षट् राज्येषु अन्वेषणाभियानं कृत्वा प्रमुखे डिजिटल-वंचन-प्रकरणे त्रयः आरोपिणः निगडिताः। विभागेन, दिल्ली, कर्नाटकस्य बेङ्गलूरु, केरलस्य पलाक्काड्, महाराष्ट्रस्य नागपुर, तेलंगानाराज्यस्य हैदराबाद, गोवा च अनेकस्थानेषु अन्वेषणं कृतम्।

**क्रिकेट्**

ऐषमः अन्ताराष्ट्रिय-विंशतिम्-प्रतिविंशतिः क्रिकेट् विश्व-चषक-क्रीडायां गतरात्रौ कोलम्बोनगरस्य आर. प्रेमादास-क्रीडाङ्गणे द्वितीय-समूह-सुपर-अष्ट-क्रीडायां न्यूज़ीलैण्ड्-देशः श्रीलङ्का-देशं एकषष्ठिः धावनांकैः पराजितवान्। अद्य अपराह्णे अहमदाबादनगरस्य नरेन्द्रमोदीक्रीडाङ्गणे वेस्ट्इण्डीज-दलं दक्षिण-आफ्रिका-दलं सम्मुखीकरिष्यति। मध्याह्ने त्रिवादने क्रीडा आरभ्यते। सायंकाले चेन्नैनगरस्य एम.ए.चिदम्बरम-क्रीडाङ्गणे भारतेन जिम्बाब्वे-दलं विरुद्ध्य क्रीडिष्यते। सायं सप्तवादने अस्याः क्रीडायाः आरम्भः भविष्यति।